दिनाङ्क :-05.12.2024

प्रात: - 06:55

## भारतीय जनता पार्टी

भारतीयजनतापार्टी इति दलस्य वरिष्ठो नेता देवेन्द्रफडणवीस: अद्य तृतीयं वारं महाराष्ट्रस्य मुख्यमन्त्रिरूपेण शपथवचनं स्वीकरिष्यति। महाराष्ट्रस्य राज्यपालमहोदय: सीपी राधाकृष्णन् इत्यसौ अद्य सायंकाले सार्धपञ्चवादने मुम्बय्या: ऐतिहासिके आजादमैदान इति प्राङ्गणे पदगोपनीयताया: शपथं दापयिष्यति। एतत्पूर्वं गतदिने श्रीफडणवीस: सर्वसम्मत्या भाजपा विधायक दलस्य नेतृरूपेण चित:। श्रीफडणवीस: सहयोगिभि: दलप्रमुखै: शिवसेनाप्रमुखेण एकनाथशिंदे इत्यनेन, अथ एनसीपी दलप्रमुखेण अजितपवार इत्यनेन च साकं राज्यपालवर्येण साकं उपवेशनं कृतवान्। अद्य शपथग्रहण समारोहे प्रधानमन्त्री नरेन्द्रमोदी, एनडीए ग्रन्थियुतशासनानां मुख्यमन्त्रिण: केन्द्रीय मन्त्रिणश्च समारोहे एतस्मिन् भागं भजिष्यन्ति।

## जयशंकर:

विदेशमन्त्री डॉ. सुब्रह्मण्यम जयशंकर: गतदिने नवदेहल्यां स्वीय कुवैतदेशीय समकक्षेण अब्दुल्ला- अली- अल-याहा इत्यनेन साकं बहुविधविषयात्यिकीं चर्चां कृतवान् । एतस्मिन् उपवेशने भारत-कुवैत-देशयो: सम्बधानां सुदृढीकरणे मुख्यत्वेन मन्त्रणा सञ्जाता। उभाभ्यां नेतृभ्यां सहयोगाय एकस्य संयुक्त-आयोगस्य स्थापनायै अनुबन्धज्ञापने हस्ताक्षराणि विहितानि।

## भूटान नरेश:

भूटाननरेश: जिग्मे खेसर नामगेल वांगचुक इत्यसौ अथ महारानी जेटसन पेमा वांगचुक इत्येषा च अद्य प्रभृति द्विदिवसीयायां भारतयात्रायाम् आगमिष्यत:। भूटान नरेश: प्रधानमन्त्रिणा नरेन्द्रमोदिना साकं मेलनं करिष्यति।

विदेशमन्त्री डॉ.एस.जयशंकर: शासनस्य नैके वरिष्ठाधिकारिणश्चापि भूटाननरेशेण साकं चर्चां करिष्यन्त:।

<u>इसरो/प्रोबा-3</u>

भारतीयान्तरिक्षानुसन्धान-संघटनम् प्राप्त विसङ्गते: कारणात् अद्य अपराह्णे द्वादश-निमेषाधिक-चतुर्वादने श्रीहरिकोटाया: सतीश-धवनान्तरिक्ष-केन्द्रात् पी.एस्.एल्.वी.सी.-59-प्रोबा-3 इत्येतस्य प्रक्षेपणं पुनर्निर्धारितं। यूरोपीयान्तरिक्ष-संस्थाया: प्रोबा-3- प्रक्षेपणोपक्रम: भारतीयान्तरिक्षानुसन्धान-सङ्घटनस्य न्यू-स्पेस्-इण्डिया-लिमिटेड्-इत्येतस्या: वाणिज्यिक-शाखाया: सहयोगेन भवति।

<u>भारत-वैश्विकदक्षिणः</u>

भारतेन विकासशीलराष्ट्रानाम् उत्तम सहयोगार्थं वैश्विकवित्तीय-व्यवस्थायां परिवर्तनस्य आह्वानं कृतम्, अन्ताराष्ट्रीय-वित्तीय-संस्थासु वैश्विकदक्षिणस्य अधिकं प्रतिनिधित्वं बहुपक्षीय-विकास-बैङ्क इत्येतेषां (MDBs) वित्तपोषणं वर्धयितुं च बलं दत्तम्। संयुक्तराष्ट्रसङ्घस्य उपवेशने प्रवदन्ती वित्तमन्त्रालयस्य आर्थिक-कार्य-विभागस्य परामर्शदा भारतस्य सुश्री गीतुजोशी विकासशील-देशानां आवश्यकता: प्रति अधिकं प्रतिक्रियाशीलस्य वित्तीय-व्यवस्थायाः आवश्यकतायाः उपरि बलं दत्तवती। श्रीजोशी भारतस्य मानव-केन्द्रित-विकास-प्रतिरूपं वैश्विक-दक्षिणस्य उदाहरण-रूपेण प्रकाशितं यत् पञ्चविंशतिः कोटिजनाः निर्धन-रेखात: बहिः उत्थापिताः।

<u>नौसेना- राजनाथ :</u>

रक्षामन्त्री राजनाथसिंहः नौसेना दिवसस्य अवसरे भारतीय नौसेनायाः सैनिकेभ्यः परिवारेभ्यः च शुभकामनाः प्रदत्तवान्।

**हॉकी-जूनियर एशिया कप :**

**हॉकीति-क्रीडायां गतदिने सायंकाले ओमान-देशस्य मस्कट्-नगरे पुरुषाणां-कनिष्ठ-हॉकी-एशिया-चषक-क्रीडायाः निर्णायकस्पर्धायाम् भारतीय-दलेन पाकिस्तान दलं पराजितम्। प्रतियोगितायां विगतविजेतृ-भारतेन अस्यां स्पर्धायां पञ्चमं वारं तथाच क्रमशः तृतीयवारं विजयं प्राप्तम्।**

**।।इति वार्ता:।।**